श्री मृत्युंजय मानसिक पूजा स्तोत्रं

श्री मृत्युंजय मानसिक पूजा स्तोत्रं

कैलासे कमनीयरत्नखचिते कल्पद्रुमूले स्थितं
कर्पूरस्फटिकेंदुसुंदरतनुं कात्यायनीसेवितं |
गंगातुंगतरंगरंजितजटाभारं कृपासागरं
कंठालंकृतशेषभूषणममुं मृत्युंजयं भावये || 1 ||

आगत्य मृत्युंजय चंद्रमौळे
व्याघ्राजिनालंकृत शूलपाणे |
स्वभक्तसंरक्षणकामधेनो
प्रसीद विश्वेश्वर पार्वतीश || 2 ||

भास्वन्मौक्तिकतोरणे मरकतस्तंभायुतालंकृते
सौधे धूपसुवासिते मणिमये माणिक्यदीपांचिते |
ब्रह्मेंद्रामरयोगिपुंगवगणैर्युक्ते च कल्पद्रुमैः
श्रीमृत्युंजय सुस्थिरो भव विभो माणिक्यसिंहासने || 3 ||

मंदारमल्लीकरवीरमाधवी-
-पुन्नागनीलोत्पलचंपकान्वितैः |
कर्पूरपाटीरसुवासितैर्जलै-
-राधत्स्व मृत्युंजय पाद्यमुत्तमं || 4 ||

सुगंधपुष्पप्रकरैः सुवासितै-
-र्वियन्नदीशीतलवारिभिः शुभैः |
त्रिलोकनाथार्तिहराघ्र्यमादरा-
-द्गृहाण मृत्युंजय सर्ववंदित || 5 ||

हिमांबुवासितैस्तोयैः शीतलैरतिपावनैः |
मृत्युंजय महादेव शुद्धाचमनमाचर || 6 ||

गुडदधिसहितं मधुप्रकीर्णं
सुघृतसमन्वितधेनुदुग्धयुक्तं |
शुभकर मधुपर्कमाहर त्वं
त्रिनयन मृत्युहर त्रिलोकवंद्य || 7 ||

पंचास्त्र शांत पंचास्य पंचपातकसंहर |
पंचामृतस्नानमिदं कुरु मृत्युंजय प्रभो || 8 ||

जगत्त्रयीख्यात समस्ततीर्थ-
-समाहृतैः कल्मषहारिभिश्च |
स्नानं सुतोयैः समुदाचर त्वं
मृत्युंजयानंतगुणाभिराम || 9 ||

आनीतेनातिशुभ्रेण कौशेयेनामरद्रुमात् |
मार्जयामि जटाभारं शिव मृत्युंजय प्रभो || 10 ||

नानाहेमविचित्राणि चीरचीनांबराणि च |
विविधानि च दिव्यानि मृत्युंजय सुधारय || 11 ||

विशुद्धमुक्ताफलजालरम्यं
मनोहरं कांचनहेमसूत्रं |
यज्ञोपवीतं परमं पवित्र-
-माधत्स्व मृत्युंजय भक्तिगम्य || 12 ||

श्रीगंधं घनसारकुंकुमयुतं कस्तूरिकापूरितं
कालेयेन हिमांबुना विरचितं मंदारसंवासितं |
दिव्यं देवमनोहरं मणिमये पात्रे समारोपितं
सर्वांगेषु विलेपयामि सततं मृत्युंजय श्रीविभो || 13 ||

अक्षतैर्धवलैर्दिव्यैः सम्यक्तिलसमन्वितैः |
मृत्युंजय महादेव पूजयामि वृषध्वज || 14 ||

चंपकपंकजकुरवककुंदैः करवीरमल्लिकाकुसुमैः |
विस्तारय निजमकुटं मृत्युंजय पुंडरीकनयनाप्त || 15 ||

माणिक्यपादुकाद्वंद्वे मौनिहृत्पद्ममंदिरे |
पादौ सत्पद्मसदृशौ मृत्युंजय निवेशय || 16 ||

माणिक्यकेयूरकिरीटहारैः
कांचीमणिस्थापितकुंडलैश्च |
मंजीरमुख्याभरणैर्मनोज्ञै-
-रंगानि मृत्युंजय भूषयामि || 17 ||

गजवदनस्कंदधृते-
-नातिस्वच्छेन चामरयुगेन |
गलदलकाननपद्मं
मृत्युंजय भावयामि हृत्पद्मे || 18 ||

मुक्तातपत्रं शशिकोटिशुभ्रं
शुभप्रदं कांचनदंडयुक्तं |
माणिक्यसंस्थापितहेमकुंभं
सुरेश मृत्युंजय तेऽर्पयामि || 19 ||

मणिमुकुरे निष्पटले
त्रिजगद्गाढांधकारसप्ताश्वे |
कंदर्पकोटिसदृशं
मृत्युंजय पश्य वदनमात्मीयं || 20 ||

कर्पूरचूर्णं कपिलाज्यपूतं
दास्यामि कालेयसमान्वितैश्च |
समुद्भवं पावनगंधधूपितं
मृत्युंजयांगं परिकल्पयामि || 21 ||

वर्तित्रयोपेतमखंडदीप्त्या
तमोहरं बाह्यमथांतरं च |
साज्यं समस्तामरवर्गहृद्यं
सुरेश मृत्युंजय वंशदीपं || 22 ||

राजान्नं मधुरान्वितं च मृदुलं माणिक्यपात्रे स्थितं
हिंगूजीरकसन्मरीचिमिलितैः शाकैरनेकैः शुभैः |
शाकं सम्यगपूपसूपसहितं सद्योघृतेनाप्लुतं
श्रीमृत्युंजय पार्वतीप्रिय विभो सापोशनं भुज्यतां || 23 ||

कूश्मांडवार्ताकपटोलिकानां
फलानि रम्याणि च कारवल्ल्या |
सुपाकयुक्तानि ससौरभाणि
श्रीकंठ मृत्युंजय भक्षयेश || 24 ||

शीतलं मधुरं स्वच्छं पावनं वासितं लघु |
मध्ये स्वीकुरु पानीयं शिव मृत्युंजय प्रभो || 25 ||

शर्करामिलितं स्निग्धं दुग्धान्नं गोघृतान्वितं |
कदलीफलसंमिश्रं भुज्यतां मृत्युसंहर || 26 ||

केवलमतिमाधुर्यं
दुग्धैः स्निग्धैश्च शर्करामिलितैः |
एलामरीचमिलितं
मृत्युंजय देव भुंक्ष्व परमान्नं || 27 ||

रंभाचूतकपित्थकंठकफलैर्द्राक्षारसस्वादुम-
-त्खर्जूरैर्मधुरेक्षुखंडशकलैः सन्नारिकेलांबुभिः |
कर्पूरेण सुवासितैर्गुडजलैर्माधुर्ययुक्तैर्विभो
श्रीमृत्युंजय पूरय त्रिभुवनाधारं विशालोदरं || 28 ||

मनोज्ञरंभावनखंडखंडिता-
-न्नुचिप्रदान्सर्षपजीरकांश्च |
ससौरभान्सैंधवसेवितांश्च
गृहाण मृत्युंजय लोकवंद्य || 29 ||

हिंगूजीरकसहितं
विमलामलकं कपित्थमतिमधुरं |
बिसखंडाँल्लवणयुता-
-न्मृत्युंजय तेऽर्पयामि जगदीश || 30 ||

एलाशुंठीसहीतं
दध्यन्नं चारुहेमपात्रस्थं |
अमृतप्रतिनिधिमाढ्यं
मृत्युंजय भुज्यतां त्रिलोकेश || 31 ||

जंबीरनीरांचितशृंगबेरं
मनोहरानम्लशलाटुखंडान् |
मृदूपदंशान्सहसोपभुंक्ष्व
मृत्युंजय श्रीकरुणासमुद्र || 32 ||

नागररामठयुक्तं
सुललितजंबीरनीरसंपूर्णं |
मथितं सैंधवसहितं
पिब हर मृत्युंजय क्रतुध्वंसिन् || 33 ||

मंदारहेमांबुजगंधयुक्तै-
-र्मंदाकिनीनिर्मलपुण्यतोयैः |
गृहाण मृत्युंजय पूर्णकाम
श्रीमत्परापोशनमभ्रकेश || 34 ||

गगनधुनीविमलजलै-
-र्मृत्युंजय पद्मरागपात्रगतैः |
मृगमदचंदनपूर्णं
प्रक्षालय चारु हस्तपदयुग्मं || 35 ||

पुंनागमल्लिकाकुंदवासितैर्जाह्नवीजलैः |
मृत्युंजय महादेव पुनराचमनं कुरु || 36 ||

मौक्तिकचूर्णसमेतै-
-मृगमदघनसारवासितैः पूगैः |
पर्णैः स्वर्णसमानै-
-मृत्युंजय तेऽर्पयामि तांबूलं || 37 ||

नीराजनं निर्मलदीप्तिमद्भि-
-र्दीपांकुरैरुज्ज्वलमुच्छ्रितैश्च |
घंटानिनादेन समर्पयामि
मृत्युंजयाय त्रिपुरांतकाय || 38 ||

विरिंचिमुख्यामरबृंदवंदिते
सरोजमत्स्यांकितचक्रचिह्नते |
ददामि मृत्युंजय पादपंकजे
फणींद्रभूषे पुनरर्घ्यमीश्वर || 39 ||

पुंनागनीलोत्पलकुंदजाजी-
-मंदारमल्लीकरवीरपंकजैः |
पुष्पांजलिं बिल्वदलैस्तुलस्या
मृत्युंजयांघ्रौ विनिवेशयामि || 40 ||

पदे पदे सर्वतमोनिकृंतनं
पदे पदे सर्वशुभप्रदायकं |
प्रदक्षिणं भक्तियुतेन चेतसा
करोमि मृत्युंजय रक्ष रक्ष मां || 41 ||

नमो गौरीशाय स्फटिकधवळांगाय च नमो
नमो लोकेशाय स्तुतविबुधलोकाय च नमः |
नमः श्रीकंठाय क्षपितपुरदैत्याय च नमो
नमः फालाक्षाय स्मरमदविनाशाय च नमः || 42 ||

संसारे जनितापरोगसहिते तापत्रयाक्रंदिते
नित्यं पुत्रकलत्रवित्तविलसत्पाशैर्निबद्धं दृढं |
गर्वांधं बहुपापवर्गसहितं कारुण्यदृष्ट्या विभो
श्रीमृत्युंजय पार्वतीप्रिय सदा मां पाहि सर्वेश्वर || 43 ||

सौधे रत्नमये नवोत्पलदलाकीर्णे च तल्पांतरे
कौशेयेन मनोहरेण धवलेनाच्छादिते सर्वशः |
कर्पूरांचितदीपदीप्तिमिलिते रम्योपधानद्वये
पार्वत्याः करपद्मलालितपदं मृत्युंजयं भावये || 44 ||

चतुश्चत्वारिंशद्विलसदुपचारैरभिमतै-
-र्मनः पद्मे भक्त्या बहिरपि च पूजां शुभकरीं |
करोति प्रत्यूषे निशि दिवसमध्येऽपि च पुमा-
-न्प्रयाति श्रीमृत्युंजयपदमनेकाद्भुतपदं || 45 ||

प्रातर्लिंगमुमापतेरहरहः संदर्शनात्स्वर्गदं
मध्याह्ने हयमेधतुल्यफलदं सायंतने मोक्षदं |
भानोरस्तमये प्रदोषसमये पंचाक्षराराधनं
तत्कालत्रयतुल्यमिष्टफलदं सद्योऽनवद्यं दृढं || 46 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्रीमृत्युंजय मानसिकपूजा स्तोत्रं संपूर्णं ||